वीर, ड तु क शौर्य्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-आत्म०-अक०-सेट्।) ङ, अविवीरत। शौर्य्यमुद्यमः। इति दुर्गादासः॥

वीरं, क्ली, (अज्+"स्फायितञ्चिवञ्चीति।" उणा० २।१३। इत्यादिना रक्। अजेर्वीभावः। वीर+अच् वा।) शृङ्गी। नड़ः। इति मेदिनी। रे, ६७॥ मरिचम्। पुष्करमूलम्। काञ्जिकम्। उशीरम्। आरूकम्। इति राजनिर्घण्टः॥ वीरशब्दो मेदिन्यां पवर्गीयबकारादौ दृष्टोऽपि वीरधातोरन्तःस्थवकारादौ दर्शनादत्र लिखितः॥

वीरः, पुं, (वीरयतीति। वीर विक्रान्तौ+पचाद्यच्। यद्वा, विशेषेण ईरयति दूरीकरोति शत्रून्। वि+ईर+इगुपधात् कः। यद्वा, अजति क्षिपति शत्रून्। अज+स्फायितञ्चीत्यादिना रक्। अजेर्व्वीः।) शौर्य्यविशिष्टः। तत्पर्य्यायः। शूरः २ विक्रान्तः ३। इत्यमरः।२।८।७७। गब्भीरः ४ तरस्वी ५। इति जटाधरः॥ (यथा, महाभारते। १।१४१।४५।

"मृगराजो वृकश्चैव बुद्धिमानपि मूषिकः। निर्ज्जिता यत्त्वया वीरास्तस्माद्वीरतरो भवान्॥"

यथा च ऋग्वेदे। १।११४।८।

"वीरान्मानो रुद्रभामितो वधी-
र्हविष्मन्तः सदमित्त्वा हवामहे॥"

"वीरान् वीक्रान्तान्।" इति सायणः॥ पुत्रः। यथा, ऋग्वेदे। ५।२०।४।

"वीरैः स्याम सधमादः॥"

"वीरैः पुत्रैश्च सधमादः सहमाद्यन्तः स्याम तथा कुरु।" इति तद्भाष्ये सायणः।॥ * ॥ पतिः। पुत्रश्च। यथा, मार्कण्डेये। ३५।३१।

"न चावेक्ष्यनदिरां वीरहीनां तथा स्त्रियम्। गृहादुच्छिष्टविण्मूत्रपादाम्भांसि क्षिपेद्बहिः॥"

यथा च अवीरा निष्पतिसुता। इत्यमरदर्शनाच्च॥ * ॥ दनायुदैत्यपुत्रः। यथा, महाभारते। १।६५।३३।

"दनायुषः पुनः पुत्राश्चत्वारोऽसुरपुङ्गवाः। विक्षरो बलवीरौ च वृत्रश्चैव महासुरः॥")

जिनः। नटः। इति हेमचन्द्रः। विष्णुः। यथा, वीरोऽनन्तो धनञ्जयः। इति विष्णुसहस्रनाम॥ शृङ्गारादष्टरसान्तर्गतरसविशेषः। तत्पर्य्यायः। उत्साहवर्द्धनः २। इत्यमरः॥

"उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः। महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः॥"

उत्साहं वर्द्धयति इति उत्साहवर्द्धनः नन्द्यादित्वादनः। दानधर्म्मयुद्धेषु जीवानपेक्षोत्साहकारी रसो वीरः। वीरयन्ते अत्र वीरः। वीर तङ्कृत् शौर्य्ये घञ् स्फीततयैव स्वाद्यते इति सर्व्वरसलक्षणं कटाक्षितम्। इति भरतः॥ * ॥ तान्त्रिकभावविशेषः। यथा,—

"तत्रैव त्रिविधो भावो दिव्यवीरपशुक्रमः। दिव्यवीरैकत्र प्रोक्तः सर्व्वसिद्धिप्रदायकः॥"

इति रुद्रयामले ११ पटलः।

अपि च।

"भावस्तु त्रिविधः प्रोक्तो दिव्यवीरपशुक्रमात्। गुरवश्च त्रिधा चात्र तथैव मन्त्रदेवता॥"

इति तत्रैव ६ पटलः॥

अन्यच्च।

"पशुभावं हि प्रथमे द्वितीये वीरभावकम्। तृतीये दिव्यभावञ्च इति भावत्रयं क्रमात्॥ आदौ दशमदण्डेन पशुभावमथापि वा। मध्याह्ने दशदण्डेन वीरभावमुदाहृतम्। सायाह्ने दशदण्डे तु दिव्यभावं शुभप्रदम्॥"

इति च तत्रैव १९ पटलः॥

अन्यच्च।

"जन्ममात्रं पशुभावं वर्षषोड़शकावधि। ततश्च वीरभावस्तु यावत् पञ्चाशतो भवेत्॥ द्वितीयांशे वीरभावस्तृतीये दिव्यभावकः। एवं भावत्रयेणैव भावमैक्यं भवेत् प्रिये॥"

इति वामकेश्वरतन्त्रे ५१ पटलः॥

वीराचारविशिष्टः। यथा,—

"कुलाचाररतो वीरः कुलसङ्गी सदा भवेत्। संविदासेवनं कुर्य्यात् सोमपानं महेश्वरि॥ सर्व्वथा कुरुते देवि वीरश्चोद्धतमानसः। दिव्यस्तु देवता प्रायश्चन्दनागुरुलेपनैः। रक्तचन्दनगन्धैश्च सुदिग्धो नात्र संशयः॥ भस्माङ्गधूसरो वीर उन्मत्तवद्विचेष्टितः। सुरापानरतो नित्यं बलिपूजापरायणः॥ नरश्छागश्च महिषो मेषः शूकर एव च। शशकः शल्लकी गोधा खड्गी कूर्म्मो दश स्मृताः॥ वानरश्च खरश्चैव गजाश्वादिविहङ्गमाः। इत्यादिभिर्ब्बलिदानैः पूजयेत् स्वेष्टदेवताम्॥ सिद्धमन्त्रो भवेत् वीरो न वीरो मद्यपानतः। कलौ तु भारते वर्षे लोका भारतवासिनः। गृहे गृहे सुरां पीत्वा वर्णभ्रष्टा भवन्ति हि॥"

इत्युत्पत्तितन्त्रम्॥ * ॥

कलौ तदाचारनिषेधो यथा,—

"दिव्यवीरमयो भावः कलौ नास्ति कदाचन। केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्॥"

इति महानिर्व्वाणतन्त्रम्॥ * ॥

तण्डुलीयः। वराहकन्दः। लताकरञ्जः। करवीरः। अर्ज्जुनः। इति राजनिर्घण्टः॥ यज्ञाग्निः। इति वीरशाब्दटीकायां भरतः॥ उत्तरः। सुभटः। इति मेदिनी॥

वीरः, त्रि, श्रेष्ठः। इति हेमचन्द्रः॥ (कर्म्मठः। यथा, ऋग्वेदे। ८।२३।१९।

"इमं घा वीरो अमृतं दूतं कृण्वीत मर्त्त्यः॥"

"वीरः कर्म्मणि समर्थः।" इति तद्भाष्ये सायणः॥ यथा च। तत्रैव। ६।२३।३।

"कर्त्ता वीराय सुष्वय उलोकं
दाता वसु स्तुवते कीरये चित्॥"

"वीराय यज्ञादि कर्म्मसु दक्षाय।" इति तद्भाष्ये सायणः॥ प्रेरयिता। यथा, तत्रैव। ६।६५।४।

"इदा हि वो विधते रत्नमस्तीदा
वीराय दाशुष उषासः॥"

"वीराय प्रेरयित्रे।" इति तद्भाष्ये सायणः॥)

वीरकः, पुं, (वीर एव। स्वार्थे कन्।) करवीरः। इति राजनिर्घण्टः॥ (विक्रान्तः। समर्थः। यथा, ऋग्वेदे। ८।८०।२।

"असौ य एषि वीरको गृहं गृहं विचाकशत्॥"

"वीरको वीरः समर्थस्त्वम्।" इति तद्भाष्ये सायणः॥ अपकृष्टदेशविशेषवासी। यथा, महाभारते। ८।४४।४२।

"कारस्करान् माहिषकान् कालिङ्गान् केरलांस्तथा। कर्कोटकान् वीरकांश्च दुर्द्धर्म्मांश्च विवर्ज्जयेत्॥"

चाक्षुषमन्वन्तरीयसुरान्यतमः। यथा, भागवते। ८।५।८।

"सुनयस्तत्र वै राजन् हर्य्यस्वद्वीरकादयः॥")

वीरजयन्तिका, स्त्री, (वीराणां जयन्तिकेव।) रणे वीराणां नृत्यम्। इति हेमचन्द्रः॥

वीरणं, क्ली, उशीरतृणम्। तत्पर्य्यायः। वीरणम् २ कटायनम् ३। इति शब्दरत्नावली॥ वीरतरम् ४। इत्यमरः॥ वीरभद्रम् ५। इति रुद्रः॥ (यथा, भागवते। १०।११।५१।

"तमापतन्तं स निगृह्य तुण्डयो-
र्दोर्भ्यां बकं कंससखं सतां पतिः।
पश्यत्सु बालेषु ददार लीलया
मुदावहो वीरणवद्दिवौकसाम्॥")

अपि च।

"स्याद्वीरणं वीरतरं वीरञ्च बहुमूलकम्। वीरणं पाचनं शीतं स्तम्भनं लघु तिक्तकम्॥ मधुरं ज्वरहृद्दान्तिमेदजित् कफपित्तहृत्। तृष्णास्रविषवीसर्पकृच्छ्रदाहव्रणापहम्॥ वीरणस्य तु मूलं स्यादुशीरमभयं तथा। अमृणालञ्च सेव्यञ्च समगन्धिकमित्यपि॥ उशीरं पाचनं शीतं स्तम्भनं लघु तिक्तकम्। मधुरं ज्वरहृद्वान्तिमदहृत् कफपित्तहृत्। तृषास्रविषवीसर्पदाहकृच्छ्रव्रणापहम्॥"

इति भावप्रकाशः॥

(पुं, प्रजापतिविशेषः। यथा, महाभारते। १२।३४८।४९।

"सनत्कुमारादपि च वीरणो वै प्रजापतिः। कृतादौ कुरुशार्द्दूल धर्म्ममेतदधीतवान्॥"

यथा च मात्स्ये। ४।४०।

"वीरणस्यात्मजायान्तु चाक्षुर्म्मनुमजीजनत्॥")

वीरतरं, क्ली, वीरणम्। इत्यमरः॥

वीरतरः, पुं, शरः। इति भूरिप्रयोगः॥ (त्रि, सामर्थ्यवान्। यथा, ऋग्वेदे। ८।२४।१५।

"नह्यङ्ग पुराचन जज्ञे वीरतरस्त्वत्॥"

"वीरतरः सामर्थ्यवान्।" इति तद्भाष्ये सायणः॥ अयमनयोरतिशयेन वीरः। वीरश्रेष्ठः। यथा, महाभारते। ४।५२।१४।

"नरर्षभास्ते तु नरर्षभेण
वीरा रणे वीरतरेण भग्नाः॥")